मथुरवननामानमष्टमं परिकीर्त्तितम् ८ ।
मार्कण्डेयवनं श्रेष्ठं नवमं मानवर्द्धनम् ९ ।
शेषशायिवनं श्रेष्ठं दशमं पापनाशनम् १० ।
एकादशं समाख्यातं नारदाख्यं शुभोदितम् ११ ।
द्वादशं परमानन्दवनं सर्व्वार्थदायकम् १२ ।
इति द्वादशसंख्यानि वनान्युपवनानि च ।"
इति द्वादशोपवनानि । * ।

अथ द्वादशप्रतिवनानि । भविष्ये ।
"आदौ रङ्गवनं श्रेष्ठं पुरसंज्ञाविराजितम् १ ।
वार्त्तावनं द्वितीयञ्च २ करहाख्यं तृतीयकम् ३ ।
चतुर्थं काम्यनामानं वनं कामप्रदं शृणाम् ४ ।
वनमञ्जननामानं पञ्चमं स्त्रीशुभप्रदम् ५ ।
नाम्ना कर्णवनं श्रेष्ठं षष्ठं स्वप्नवरप्रदम् ६ ।
कृष्णाक्षिपतकं नाम वनं सप्तममीरितम् ७ ।
नन्दप्रेक्षणकृष्णाख्यं वनं नन्दनमष्टमम् ८ ।
वनमिन्द्रवनं नाम नवमं शक्रपूजितम् ९ ।
शिक्षावनं शुभं प्रोक्तं दशमं नन्दभावितम् १० ।
चन्द्रावलीवनं श्रेष्ठमेकादशसुदाहृतम् ११ ।
नाम्ना लोहवनं श्रेष्ठं द्वादशं शुभदं शृणाम् १२ ।
इति प्रतिवनान्याहुर्मार्गे वामे च दक्षिणे ।
इति द्वादशसंख्यास्ते देवावासफलप्रदाः ।"
इति द्वादश प्रतिवनानि । * ।

अथ द्वादशाधिवनानि । विष्णुपुराणे ।
"मथुरा प्रथमं नाम १ राधाकुण्डं द्वितीयकम् २ ।
नन्दग्रामं तृतीयञ्च ३ गूढस्थानं चतुर्थकम् ४ ।
पञ्चमं ललिताग्रामं ५ वृषभानुपुरञ्च षट् ६ ।
सप्तमं गोकुलं स्थान-७ मष्टमं बलदेवकम् ८ ।
गोवर्द्धनवनं श्रेष्ठं नवमं काममाप्रदम् ९ ।
वनं जाववटं नाम दशमं परिकीर्त्तितम् १० ।
वृन्दावनं श्रेष्ठमेकादशं प्रकीर्त्तितम् ११ ।
सङ्केतवटकं स्थानं वनं द्वादशं कीर्त्तितम् १२ ।
इति द्वादशसंख्यानि वनान्यधिवनानि च ।
वनानामधिपाः प्रोक्ता व्रजमण्डलमध्यगाः ।
एषां नैव विलोकेन वनयात्रा च निष्फला ।
एतास्च दर्शनेनैव वनयात्रा शुभप्रदा ।
आदौ लीला यदा पश्चिद्वनयात्रां ततश्चरेत् ।
सर्व्वान् कामानवाप्नोति विष्णुलोकमवाप्नुयात् ।
सर्व्वत्र विजयी भूयाद्वनयात्राप्रभावतः ।"
इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजकः, पुं, तपस्वी । इति शब्दरत्नावली ।

व्रजकिशोरः, पुं ( व्रजस्य किशोरः । ) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतललिताग्रामाधिवनाधिपो देवः । "अथ ललिताग्रामाधिपव्रजकिशोरमन्त्रः । यथा श्रीधरोपनिषदि । ॐ श्रीँ ललिताग्रामाधिवनाधिपतये व्रजकिशोराय नमः । इत्येकविंशाक्षरो व्रजकिशोरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य विभाण्डक ऋषिर्व्रजकिशोरो देवता गायत्री छन्दः मम सकलपापक्षयद्वारा युगलरूपदर्शनार्थे विनियोगः । शिरसि विभाण्डकऋषये नमः मुखे व्रजकिशोराय नमः हृदि गायत्रीच्छन्दसे नमः । अथ ध्यानम् ।
'ललितासंयुतं कृष्णं सर्व्वैस्तु सखिभिर्युतम् ।
ध्यायेत्त्रिवेणिकूपस्थं महारासकृतोत्सवम् ।'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्यादिना जपं समर्पयेत् । इति ललिताग्रामाधिपव्रजकिशोरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजनाथः, पुं, ( व्रजस्य नाथः । ) श्रीकृष्णः । इति पुराणम् ।

व्रजभूः, पुं, ( व्रजे भूरुत्पत्तिर्यस्य । ) केलिकदम्बः । इति शब्दचन्द्रिका । ( व्रजस्य भूर्भूमिः । ) व्रजभूमौ, स्त्री । व्रजजाते, त्रि ।

व्रजमण्डलं, क्ली, ( व्रजस्य मण्डलम् ।) व्रजभूमिः । यथा, मात्स्ये ।
"व्रजमण्डलभूगोलं शेषनागफणं वरम् ।
कृष्णराख्यं महाश्रेष्ठं सर्व्वेषां मध्यसंस्थितम् ।"
इति व्रजविलासे १ अध्यायः ।

व्रजमोहनः, पुं, ( व्रजान् व्रजवासिनो मोहयतीति । मुह + णिच् + ल्युल् ।) श्रीकृष्णः । इति पुराणम् ।

व्रजवरः, पुं, ( व्रजे वरः श्रेष्ठः । ) श्रीकृष्णः । स तु द्वादशाधिवनान्तर्गतजाववटाधिवनाधिपो देवः । "अथ जाववटाधिवनाधिपव्रजवरमन्त्रः । शौनकीये ।
'वटाङ्घ्रिः समन्तात् सघनं वनमाश्रितम् ।
तमेवाधिवनं ख्यातं वटसेवापरायणम् ।
तस्मिन्मध्ये वटं श्रेष्ठं कृष्णक्रीडावरप्रदम् ।
वटाङ्घ्रिवनं ख्यातं मध्ये चैव वटं स्मृतम् ।
वटं दृष्टं स्थितं तत्र वटसंज्ञं विधीयते ।
वटनामानुसारेण वटचिह्नानि दर्शयेत् ।'
वटस्थानचिह्नम् । ॐ ठः जाँ वटाधिवनाधिपतये व्रजवराय नमः । इत्येकोनविंशाक्षरो जाववटाधिवनाधिपव्रजवरमन्त्रः । अनेन मन्त्रेण प्राणायामः । अस्य मन्त्रस्य वलीक ऋषिर्जाववटाधिपो व्रजवरो देवता पङ्क्तिश्छन्दः मम सकलसौभाग्यसम्पत्फलप्राप्त्यर्थे जपे विनियोगः । न्यासं पूर्व्ववत् । अथ ध्यानम् ।
'नानाशृङ्गारभूषाढ्यं राधाकृष्णं मनोहरम् ।
ध्यायेद्युगलमूर्त्तिञ्च वनयात्रावरप्रदम् ।'
इति ध्यात्वा यथाशक्ति जपं कृत्वा गुह्यातीत्यादिना जपं समर्पयेत् । इति जाववटाधिवनाधिपव्रजवरमन्त्रः ।" इति व्रजभक्तिविलासे १ अध्यायः ।

व्रजवल्लभः, पुं, ( व्रजानां व्रजवासिनां वल्लभः प्रियः । ) श्रीकृष्णः । इति पुराणम् ।

व्रजाङ्गना, स्त्री, ( व्रजस्य अङ्गना । ) गोपी । यथा, छन्दोमञ्जर्य्याम् ।
"विलासवंशध्वनितं सुधानिलैः
प्रपूर्य्य यः पञ्चमरागसुन्दरम् ।
व्रजाङ्गनानामपि गानशालिनां
जहार मानं स हरिः पुनातु वः ।"

व्रज्या, स्त्री, (व्रजनमिति । व्रज गतौ + "व्रजयजोर्भावे क्यप् ।" ३ । ३ । ९८ । इति क्यप् । ) पर्य्यटनम् । जिगीषोः प्रयाणम् । गमनम् । इत्यमरः । वर्गः । इति मेदिनी । ( सजातीयानामेकत्र सन्निवेशः । यथा, साहित्यदर्पणे । ६ । ५६५ ।
"कोषः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः ।
व्रज्याक्रमेण रचितः स एवातिमनोहरः ।")
रङ्गः । इति धरणिः ।

व्रण, शब्दे । इति कविकल्पद्रुमः । ( भ्वा०-पर०-अक०-सेट् । ) व्रणति । इति दुर्गादासः ।

व्रण, त् क अङ्गचूर्णे । इति कविकल्पद्रुमः । ( अदन्त चुरा०-पर०-सक०-सेट् । ) अङ्गचूर्णः अङ्गभेदः । व्रणयति गात्रं बाणेन भटः । इति दुर्गादासः ।

व्रणः, पुं क्ली, ( व्रणयति गात्रमिति । व्रण अङ्गचूर्णे + पचादित्वात् अच् ।) क्षतम् । तत्पर्य्यायः । ईर्म्मम् २ अरुः ३ । इत्यमरः । ईर्म्मः ४ । इति तट्टीका । ( यथा, रघुः । १२ । ५५ ।
"स रावणहृतां ताभ्यां वचसाचष्ट मैथिलीम् ।
आत्मनः सुमहत् कर्म्म व्रणैरावेद्य संस्थितः ।")
अथ व्रणाधिकारः ।
"व्रणो द्विधा परिज्ञेयो दोषजागन्तुभेदतः ।
दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसम्भवः ।"
तत्र वातिकस्य लक्षणमाह ।
"स्तब्धः कठिनसंस्पर्शो मन्दस्रावो महारुजः ।
तुद्यते स्फुटितश्चावो व्रणो मारुतसम्भवः ।"
स्तब्धः चपलः । * । पैत्तिकमाह ।
"तृष्णामोहज्वरक्लेददाहदुःखावदारणैः ।
व्रणं पित्तकृतं विद्यात् स्रावैर्गन्धैश्च पूतिकैः ।"
क्लेद आर्द्रता । दुःखं यथारूपम् । अवदारणं व्रणे विदारणवत् पीडा । * । श्लैष्मिकमाह ।
"बहुपिच्छो गुरुः स्निग्धस्तिमितो मन्दवेदनः ।
पाण्डुवर्णोऽल्पसंक्लेदश्चिरपाकी कफव्रणः ।"
बहुपिच्छः बहुपिच्छिलः । अल्पसंक्लेद ईषदार्द्रः । * । रौधिरं द्वन्द्वं सान्निपातिकमाह ।
"रक्तो रक्तस्रुती रक्ताद्विभिजः स्यात्तदन्वयः ।"
तदन्वयः द्वित्रिदोषलिङ्गसमन्वः । * । शुद्धव्रणलिङ्गमाह ।
"जिह्वातलाभोऽतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः ।
सुव्यवस्थो निरास्रावः शुद्धव्रण इति स्मृतः ।"
जिह्वातलाभः कृतमन्दोऽन्न सरूपार्थः । तेन जिह्वावर्णः । सुव्यवस्थः उच्चनतारहितः । दुष्टव्रणलिङ्गमाह ।
"पूतिपूयादिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः ।
दुष्टव्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्य्ययः ।"
उत्सङ्गी कोटरवान् । अतिगन्धादिः आदिशब्देन स्राववेदनाविवर्णतादयः संगृह्यन्ते । * । संरोहणस्य लिङ्गमाह ।
"कपोतवर्णप्रतिमा यस्यां तालोदवर्जिताः ।
स्थिराश्च पिडकावन्तो रोहतीति तमादिशेत् ।"